# Tamantimam Gurum Bhaje

# તમન્તિમં ગુરું ભજે

## Document Information

Text title : Tamantimam Gurum Bhaje on Guru Govindasimha

File name : tamantimaMguruMbhaje.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Krishnalala Nadanah

Transliterated by : Rishbha Bhagi

Proofread by : Rishbha Bhagi

Description/comments : Vishwa-sanskritam February 1967

Latest update : July 2, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 2, 2022

*sanskritdocuments.org*

# Tamantimam Gurum Bhaje

# તમન્તિમં ગુરું ભજે

ગુરુગોવિન્દસિંહં અભિલક્ષ્ય વિલિખિતા ।

જ્વલત્તડિદ્ઘનો યથા સુખોદકપ્રદસ્તથા
પ્રચણ્ડખડ્ગધારિણં તથા દયાર્દ્રચેતસમ્ ।
જયપ્રણાદઘોષકં પદપ્રહારકમ્પકં
ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૧॥

ગુરોર્યથાર્થનામ્ન આત્મજો બહાદુરસ્ય ભોઃ
તથૈવ વીરરક્તસંયુતો વિનાશનાય ચ ।
કૃતપ્રતિજ્ઞ એવ પ્રાણઘાતકસ્ય યઃ પિતુ-
ર્ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૨॥

હિમાલયસ્ય બિભ્રદુન્નતિં સ્થિરત્વમેવ ચ
ગભીરતાં ચ સાગરસ્ય સૂર્યવત્ પરન્તપઃ ।
સ્વધર્મરક્ષકો હિ યસ્ત્યજેદસૂનપિ દ્રુતં
ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૩॥

અતીતસઙ્ખ્યમપ્રમેયસાધનં દ્વિષદ્બલમ્
દલં ચ મુષ્ટિમેયમલ્પસાધનં ક્વ રે ગુરોઃ ।
તથાપિ સાહસેન યસ્ય લભ્યતે જયોઽધુના
ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૪॥

અહો ક્વ કોમલા તનુઃ ક્વ ચેષ્ટકાચયો દૃઢસ્
તથાપિ ધર્મમોક્ષણાદ્ વરં મૃતિર્હિ સ્વીકૃતા ।
યદીયપુત્રયુગ્મહૃત્સ્થિરત્વમદ્ભુતં સ્મૃતં
ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૫॥

પ્રવૃદ્ધવેગનિઃશ્વસત્તુરઙ્ગકોપવહ્નિના
લપલ્લપલ્લપલ્લપત્કૃપાણજિહ્વયા પુનઃ ।

પ્રચારિતં દ્વિષદ્વને ભયં હિ યેન સિંહવત્
    ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૬॥

કકારપઞ્ચકં વહન્ મૃગેન્દ્રતુલ્યવિક્રમઃ
    કરસ્થજીવિતો મુદા દ્વિષદ્વિમર્દનોદ્યતઃ ।
ભયઙ્કરો મરુદ્ગણો યદીયશિષ્યસદ્ગણો
    ધુરન્ધરં રિપુચ્છિદં તમન્તિમં ગુરું ભજે ॥ ૭॥

કૃષ્ણલાલનાદાનઃ (૧૯૬૭)
એમ એ।, ડી। એ। વી। કાલેજ, ચિત્રગુપ્તરોડ, દેહલી ।

Encoded and proofread by Rishbha Bhagi

*Tamantimam Gurum Bhaje*

pdf was typeset on July 2, 2022

Please send corrections to *sanskrit@cheerful.com*